मू =

संन्यासिनिगला

श्रीः
१

श्रीगणेशायनमः श्रीभगवानुवाच ॐकारमध्येगायत्रीमंत्रशब्रह्मा
ऋषिः महेश्वरः ऋषयःसूर्योदेवताः जगतीछंदःगार्हपत्याग्निरहंवक्ताग्नि
दक्षिणाग्निश्चत्रयश्यानानी ॐभूर्भुवःस्वःत्रैलोक्यमितिक्षेत्रंअकारशक्ति
तिवीजं ॐकारशक्तिमकारमितिकीलकंमुक्तिद्वारमितिगीतासारमंत्रं
स्यःमहंकरिष्ये ॐॐॐकारमितिमंत्र अर्जुनउवाच ॐकारस्यचमा
हात्म्यंरूपंस्थानंपरंतथा तत्सर्वंश्रोतुमिछामिब्रूहिमेपुरुषोत्तम ३
श्रीभगवानुवाच साधुपार्थमहाबाहोयन्मांत्वंपरिपृछसि विस्तारे

णप्रवक्ष्यामितन्मेनिगदितंशृणु ४ पृथिव्याग्निश्चऋग्वेदोभूरित्येवंपिताम
हः अकारेतुलयंप्राप्तेप्रथमेप्रणवांशके ५ अंतरीक्षंयजुर्वेदभूवोविष्णु
सनातनः उकारेतुलयंप्राप्तेद्वितीयेप्रणवांशके ६ दिविसूर्यःसामवेद
श्वरित्येवंमहेश्वरः मकारेतुलयंप्राप्तेतृतीयेप्रणवांशके ७ अकारःपीत
वर्णश्चरजोगुणसमुद्भवः उकारःसात्विकःशुक्लोमकारःकृष्णतामसः ८
अकारेचउकारेचमकारेचधनंजय अर्द्धमात्रासमायुक्तमिदमेकंसु
निःकलं ९ अकारोवह्निसंयुक्तउकारःसोमसंयुतः मकारोचार्द्धसंयु

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

कंऽऽकारःपरमंपदः १० योनिंबीजमहाबीजंबीजतंबीजमव्ययं उच्चारयेत्य
रंशक्तिब्रह्मरंध्रनिवासिनी ११ ऽऽकारोभगवान्विष्णुस्त्रिधात्माचत्रयोस्व
राः तस्योच्चारणमात्रेणपरंब्रह्माधिगच्छति १२ त्रिस्थानंचत्रिमात्रंचत्रयो
मंत्रास्त्रयोदशराः त्रिमात्राचार्द्धमात्रेणप्रणवंचविशिष्यते १३ स्रष्टांगंच
चतुःपादंत्रिस्थानंपंचदेवता ऽऽकारंयोभिजानातिब्रह्माविष्णुशिवात्म
कं १४ ऽऽमित्येकाक्षरंब्रह्मध्यायतेयन्मयंहृदि शब्दब्रह्मादिरूपेणश
ब्दातीतंनिरंजनं १५ ऽऽकारप्रभवावेदाऽऽकारप्रभवाःसुराः ऽऽकारात्र

राम २

भवंसर्वंत्रैलोक्यंसचराचरं १६ तस्मान्नदभ्यसेन्नित्यंसर्वांगपरमेश्वरं
ऽऽकारेनिर्मथनाभ्यासंदेहेपश्यतिगूढवत् २ ऽऽकारेचसमारोप्यपरंब्र
ह्माविचिंतयेत् १७ परंब्रह्मप्रतिष्ठाप्यप्रणवान्प्रणवेनतु प्रणवेणत्रयंचै
वमेकीकृत्यतदभ्यसेत् १८ पादाद्धेस्रतलंविद्यात्पादाद्धेवितलंभवेत् सु
तलंगुल्फदेशेतुजानुदेशेरसातलं १९ महातलंचमेदिन्यांगुह्यदेशेतला
तलं पातालंकटिदेशेतुसप्तमंपरिकीर्तितं २० भूर्लोकंनाभिमध्येतुभुव
र्लोकंतुकुक्षिषु स्वर्लोकंचहृदिस्थानेजनंतुदेशेमहस्तथा २१ कंठस्था

जनलोकंचतपोलोकंसत्यलोकंतुऊर्द्धस्थभुवनानिचतु
र्दशः २२ भूर्भुवश्चेतिमंत्रेणशरीरंपरिशुद्ध्यति शरीरंप्रणवाध्यात्वाविद्यु
न्नीलोदामिनीयथा २३ ॐमित्येकपरंब्रह्महृदिपद्मेव्यवस्थितं तंचैवा
भ्यासतेयोवैसर्ववेदापुरुषोत्तमं २४ धृतिरग्निमनोरूपंसंतोषःसमिधःस्मृ
ति इंद्रियाणिपशूनकृत्वाआत्माजयतिदीक्षितं २५ आत्मानमरणिंकृ
त्वाप्रणवंचोत्तराऽरणिं ध्याननिर्मथनाभ्यासंदेहेपश्यतिगूढवत् २६
ह्रस्वाद्दहंतिपापानिदीर्घमोक्षप्रदायकं अपजायतेनोवापित्रिविधो-

च्चारणेनतु २७ तैलधारामिवाच्छिन्नंदीर्घघंटानिनादवत् सर्वांगप्रण
वस्थाप्यायत्स्ववेदसवेदवित् २८ प्राणायामंपरंब्रह्मप्राणायामपरंशिवः
प्राणायामंपरंविष्णुपरमात्मास्वरूपकं २९ ब्रह्मात्वपुरकोज्ञेयोकुंभकोः
विष्णुरुच्यते रेचकोरुद्रदेवत्योऽसरासरपरंशिवः ३० अर्जुनउवाच अ
क्षराणिचमात्राणिसर्वदुःखसमाश्रितं विंदुभिर्भिद्यतेनादोभिद्यतेनादोकिन
भिद्यते ३१ श्रीभगवानुवाच ॐकारंध्वनिनादेनवायुःसंहरणांतकं नि
रालंबसमुद्रस्ययत्रनादोलयंगता ३२ निरालंबपदेप्राप्तेचित्तेचैवलयं

गते निवर्त्तेतेक्रियासर्वोयस्मिन्दृष्टेपरापरे ३३ गमागमस्थंगमनादिशू
न्यंचिद्रुपदीपंतिमिरांधकारं पश्यामितेसर्वजनांतरस्थंनमाम्यहंतंपर
मात्मरूपं ३४ अनाहतस्यशब्दस्यतस्यशब्दस्ययोध्वनी ध्वनिरंतर्गतंज्यो
तिर्ज्योतिरंतर्गतंमनः ३५ तन्मनंविलयंयातितद्विष्णोःपरमंपदं तत्पदंप
रमंध्यानंतद्ध्यानंब्रह्मउच्यते ३६ ॐशून्यमध्यशून्यमंतशून्यंनिरामं
यं चतुःशून्ययोजानातिसर्वंमुच्यतिबंधनात् ३७ शून्यभावेतिभावा
नांपुण्यपापैर्नलिप्यते शून्यंसर्वमिदंभाति शून्यानांपरमंपदं ३८ नाभि

मूलेस्थितंपद्मनालंतत्पदशोणुलं कोमलंतत्पतन्नीलंनिर्म्मलंतद्धोमुखं
३९ कदलीपुष्पसंकाशंचंद्रकोटिसमप्रभं विशालदलसंपूर्णंचारुहासं
सुनिर्म्मलं ४० पद्माकिंजल्कसदृशंतप्तकांचनसंनिभं नित्यानंदमयंस्था
नंतद्विष्णोःपरमंपदं ४१ अर्जुनउवाच ङ्कविज्ञेयंङ्कराध्येयंङ्कःप्रज्ञेयंजनार्द्द
नः अधोमुखंतुहृत्पद्मंहृदयंकेनगच्छति ४२ श्रीभगवानुवाच अधो
मुखंतुहृत्पद्मंऊर्द्ध्वंप्रणवेनतु गत्वातुपद्मकोशालंविकाशोव्याधिना
शनः ४३ अंतर्ध्यानिनपश्यंतिप्रकाशंकुरुतेतुयः अंतर्ध्यानविहीनम्

नहिलोंपरंपदं ४४ अहिपत्रेस्थितंदेवंरुद्रादिसर्व्वदेवता नैलाग्निव...
संयोगंधूमेवज्योतिरूपकं ४५ कारणंयोगविज्ञानंहेतुसाधनवर्जि
तं तस्यमध्येस्थितोभानुभानुमध्येस्थितंशशि ४६ शशिमध्येगतोवह्नि
वह्निमध्येगतःप्रभा प्रभामध्येगतंपीठंनानारत्नप्रतिष्ठितं ४७ अनेक
रत्नसंकीर्णज्वलनार्कसमप्रभं तस्यमध्येस्थितंदेवंनारायणमनामयं
४८ श्रीवत्सकौस्तुभोरस्कंपुंडरीकाक्षमच्युतं शंखंचक्रंगदापद्मंशु
लंखड्गमेवच ४९ वनमालाधनुर्ब्बाणंश्रीवाङ्धरंहरिः केयूरनूपुरा

विंदुनादकलातीतंयस्त्वंवेदसवेदवित् ५६ अर्जुनउवा...
नाम्निदृश्यमानेविनश्यति श्रवणेनुस्वयंब्रह्मकथंध्यायंतियोगि...
श्रीभगवानुवाच अंतःपूर्णंमध्यपूर्णंबहिःपूर्णंस्वयंतथा सर्वंचपूर्णमा...
नंसमाधिस्थस्यलक्षणं ५८ यावत्यशेतखगाकारंखगाकारंविदिनयेत
भिन्नेकुंभेयथाकाशंमहाकाशंप्रवर्तते ५९ विभिन्नेप्रकृतेर्देहेपश्येदा
त्मानमात्मनि यादृशंपरमंरूपंस्मरेत्तार्थेअनंतकं ६० जीवःशिवःशिवा
त्मानंभूतेभूतेष्ववस्थितं समंसर्वेषुभूतेषुतिष्ठंतंपरमेश्वरं ६१ हत्पद्मकं

तहिलोपरमंपदं ४४ अर्द्धिपत्रेस्थितंदेवंरुद्रादिसर्व्वदेवता तैलाग्नि५
संयोगंधूम्रंविद्युतिरूपकं ४५ कारणंयोगविज्ञानंहेतुसाधनवर्जि
तं तस्यमध्येस्थितोभानुभानुमध्येस्थितंशशि ४६ शशिमध्येगतोवह्नि
वह्निमध्येगतःप्रभा प्रभामध्येगतंपीठंनानारत्नप्रतिष्ठितं ४७ अनेक
रत्नसंकीर्णंज्वलनार्कसमप्रभं तस्यमध्येस्थितंदेवंनारायणमनामयं
४८ श्रीवत्सकौस्तुभोरस्कंपुंडरीकासमच्युतं शंखंचक्रंगदापद्मंतु श
ंखंखड्गंचवच ४९ वनमालाधनुर्ब्बाणंश्रीवाङ्कधरंहरिः केयूरनूपुरा

भ्यांचकटिसूत्रंचकुंडलं ५० सूर्य्यकोटिप्रतीकाशंचंद्रकोटिसुशीतलं प्र
सन्नवदनंध्यायेत्पीतांबरधरंहरिः ५१ हृदिस्थितंपद्मजमष्टपत्रंसकर्णि
कंकेशरचारुहासं अंगुष्ठमात्रंमुनयोवदंतिध्यायेच्चविष्णुंपुरुषंपुराणं
५२ कृतेश्वेतंहरिंविद्यात्त्रेतायांरक्तवर्णकं द्वापरेपीतवर्णंचनीलवर्णं
कलौयुगे ५३ सुहंसमंनिर्विकल्पंनिर्विकारंनिरंजनं अप्रमेयमयंदेवंवि
द्यात्पुरुषोत्तमं ५४ तैलाग्निवर्त्तीसंयोगमधूमज्योतिरूपकं का
रणविज्ञानंहेतुसाधनवर्जितं ५५ अमात्रंशब्दरहितंस्वरव्यं

विंदुनादकलातीतंयस्तंवेदसवेदवित् ५६ अर्जुनउवाच
नास्तिदृश्यमानेविनश्यति श्रवणंतुस्वयंब्रह्मकथंध्यायंतियोगिन
श्रीभगवानुवाच अंतःपूर्णंमधुपूर्णंबहिःपूर्णंस्वयंतथा सर्वंचपूर्णमा
नंदमाधिस्थस्यलक्षणं ५८ यावत्पश्येत्खगाकारंखगाकारंविदिनत्येत
भिन्नेकुंभेयथाकाशंमहाकाशंप्रवर्तते ५९ विलीनेदृष्टनेदेहेपश्येदा
त्मानमात्मनि यादृशंपरमंरूपंस्मरेत्यार्थेअनंतकं ६० जीवःशिवःशिवा
त्मानंभूतेभूतेव्यवस्थितं समंसर्वेषुभूतेषुतिष्ठंतंपरमेश्वरं ६१ हत्पद्मक

र्णिकामध्येशुद्धदीपशिखाकृति अंगुष्टमात्रमचलंसाकारंपरमेश्वरं ६२
आसनेवाशयनेवातिष्ठन्गच्छन्सदाशुचिः तस्मात्सर्वप्रयत्नेनयोगयु
क्तोभवार्जुन ६३ विषंशास्त्रंविदंशास्त्रंअंधस्यदर्पणंयथा सर्वंमृगति
ष्ठनात्मापश्येदात्मानमात्मनि ६४ अर्जुनउवाच देहेनष्टेकुतोबुद्धिर्बु
द्धिहीनेकुतःस्मृतिः स्मृतिहीनेकुतोज्ञानंज्ञानहीनेकुतोगतिः ६५ अतं
तमलिनेदेहेदेहेचात्यंतनिर्मले उभयोरंतरंज्ञात्वाकस्यशौचंविधीय
ते ६६ नवाविंदुकलेदेहोवरतेघटकारकं ब्रह्मासोचतुरोवेदाःधर्म

शास्त्रमनेकधाः ६७ श्रीभगवानुवाच तीर्थेषुपशुयज्ञेषुकाष्ठपाषाणम
न्मये आत्मानंयोनजानातितेसर्वेपशुवत्स्मृतः ६८ प्रतिमादामनोये
षांतेनरामूढचेतसः बहिर्भ्रमंतियःकश्चित्सर्वदेहेमहेश्वरः ६९ स्वगृ
हेपापसंत्यक्तामिक्षामटतिदुर्मतिः इदंतीर्थमिदंक्षेत्रंयेभ्रमंतितपोज
नाः ७० आत्मातीर्थंनजानंतितीर्थंतेषांनिरर्थकं तिलमध्येयथातैलं
क्षीरमध्येयथाघृतं ७१ काष्ठमध्येयथावह्निर्देहांतरव्यवस्थितं ज्ञाने
चदीपिकादेहेबूहिब्रह्मसमाश्रिता ७२ ब्रह्मज्ञानाग्निनात्यंदहते

पुण्यपापकैः मीनाजीवतिनीरेणयथाक्षीरेघृतंस्थितं ७३ अत्रमेकंभवे
न्मयेयथात्मापरमात्मनि मुहूर्तमपियोगंचएकाग्रमनसासदा ७४ सःवि
स्तरतिपापानियानिजन्मसतैरपि गीतासारमिदंशास्त्रंगीतासारसमुद्भवं
७५ तत्रस्थितंब्रह्मज्ञानंवेदज्ञानेषुनिश्चितं इदंशास्त्रमयाप्रोक्तंगुह्यवेदा
र्थसंमतं ७६ पुण्यपापहरंध्यानंसदादुःखप्रणाशनं पठितांशृण्वतांवापि
विलोर्म्माहात्म्यमुत्तमं ७७ निर्म्मथ्यसर्वशास्त्राणिकृत्स्नेनकथितंश्रुवं गी
तासारमिदंशास्त्रंगीतासारसमुच्चयं ७८ गीतासुगीताकर्तव्याःकिमन्यैः

शास्त्रविस्तरैः श्रुत्वेतनरकंघोरंगीताध्यानेपिनश्यति ७७ यास्वयंपद्म-
नाभस्यमुखपद्माद्विनिर्गीता इयंशास्त्रमयीप्रोक्तंगुह्यवेदार्थविस्तरा ७०
यत्पुण्यंपापनाशंचध्यानंदुःस्वप्ननाशनं पठतांशृण्वतांवापिविष्णोर्मा
हात्म्यमुत्तमं ७१ तेनरामोक्षमाप्नोतिसिद्धोभवतिनान्यथा श्रुत्वादशपुरा
णानिनवव्याकरणानिच ७२ निर्मथ्यचतुरोवेदान्मुनिनांभारतंकृतं
भारतोदधिनिर्मथ्यगीतानिर्मथ्यतस्यच ७४ सारमुद्धृत्यकृष्णेनअर्जु
नस्यमुखेदृतं भारतामृतसारंचभगवान्मुखनिःसृतं ७५ गीतागंगो

दकंपित्वापुनर्जन्मोनविद्यते॥ मलनिर्मोचनःपुंशांगंगास्नानदिनेदिने
७६ सकृद्गीताभस्मस्नानंसंशारमलनाशनं॥ गीतानामसहस्रंचसत्यवाज
मनुस्मृति॥ ७७॥ गजेंद्रमोक्षणंचैवयस्यकृष्णेप्रवर्तते॥ गीतासारंसदा
नारदेनसदास्मृता॥ ७८॥ सर्वशास्त्रमयीगीतासर्वदेवमयोहरिः॥ सर्वतीर्थ
मयीगंगासर्वधर्ममयापरः॥ ७९॥ पादार्द्धैःपादमेकंवाश्लोकार्द्धैःश्लोकमेव
च यन्नित्यंध्यायतेविद्वान्सोक्षमधिगच्छति ९०॥ स्वमध्येकुरुचात्मानं
आत्मामध्येस्वमंकुरु आत्मानंस्वमयंकृत्वानकिंचिदपिचिंतयेत् ९१ कृष्ण

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

दक्षसमुत्पन्नंगीतामृतहरीतकी रेजनाःकिंनखाद्यंतिकलौमलविमोचनी
९२ पद्मनूपारिजातायतोत्रवेवत्रैकपानघे ज्ञानमुद्रायकृष्णायगीतामृत
दुहेनमः ९३ सद्वोपनिषदोगावोदोग्धागोपालनंदनः पार्थोवत्ससुधीर्भो
क्तादुग्धंगीतामृतंमहत् ९४ गीतागंगाचगायत्रीगोविंदोहृदिसंस्थितं
चतुर्गीकारसंयुक्तंपुनर्जन्मनविद्यते ९५ वासुदेवस्ययेभक्तादुर्लभंगीता
मृतंमहत् ९५ वासुदेवस्ययेभक्तामनोनचलतेसदा गीतागायत्रीचयो
गीनांशाश्वतंपदमव्ययं ९६ चतुर्वेदेषुयत्पुण्यंगीतापाठेनसर्वदा एके
मनोनचलतेसदा२

नध्यानयोगेनकृतंनाहैतिषोडशीं ९७ वेदशास्त्राःपुराणानिविद्यारताश्च
तुर्दशः यत्पुण्यंशांकरीविद्यासर्वदेवनिरूपिता ९८ पठंतिचतुरोवेदाःध
र्मशास्त्रमनेकधाः ब्रह्मणेयेनयानातिद्वीपाकरसंयथा ९९ यश्चैवप
द्मनाभस्यमुखपद्माद्विनिःसृताः यःपठेत्परमांप्रीतिःसगछेद्विष्णुमव्ययं
१०० ॐकारस्यत्रिरूपंचब्रह्माविष्णुमहेश्वरः परंब्रह्मनिराकारंप्रणवंचत
थास्वयं १०१ इतिश्रीकृष्णार्जुनसंवादेगीतासारसंपूर्णं शुभमस्तु श्रीरस्तु